योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ०१

उपशमप्रकरणम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ५२
सर्गः ५३
सर्गः ५४
सर्गः ५५
सर्गः ५६
सर्गः ५७
सर्गः ५८
सर्गः ५९
सर्गः ६०
सर्गः ६१
सर्गः ६२
सर्गः ६३
सर्गः ६४
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३

प्रथमः सर्गः १

श्रीवसिष्ठ उवाच ।

अथ स्थितिप्रकरणादनन्तरमिदं श्रृणु ।

उपशमप्रकरणं ज्ञातं निर्वाणकारि यत् ।। १

श्रीवाल्मीकिरुवाच ।

शरत्तारकिताकाशस्तिमितायां सुसंसदि ।

कथयत्येवमाह्लादि वसिष्ठे पावनं वचः ।। २

श्रवणार्थित्वमौनस्थपार्थिवे संसदन्तरे ।

निर्वात इव निस्पन्दकमले कमलाकरे ।। ३

विलासिनीषु संशान्तमदमोहबलासु च ।

शममन्तः प्रयान्तीषु चिरप्रव्रजितास्विव ।। ४

कराम्भोरुहहंसेषु लीनेषु श्रवणादिव ।

मुक्तघुर्घुरवादेषु वायसेषु तराविव ।। ५

नासाग्रपरिविश्रान्ततर्जन्यङ्गुलिकोटिषु ।

विचारयत्सु विज्ञानकलां तज्ज्ञेषु राजसु ।। ६

रामे विकासमायाते प्रभात इव पङ्कजे ।

परित्यक्ततमः पीठे सूर्योदय इवाम्बरे ।। ७

आकर्णयति वासिष्ठीर्गिरो दशरथे रसात् ।

कलापिनीव जीमूतनिर्ह्रादान्मुक्तवर्षणात् ।। ८

आहृत्य सर्वभोगेभ्यो मनो मर्कटचञ्चलम् ।

श्रवणं प्रति यत्नेन सारेण मन्त्रिणि स्थिते।। ९

वसिष्ठोक्त्या परिज्ञातस्वात्मनीन्दुकलामले ।

लक्ष्मणे विलसल्लक्ष्ये शिक्षावलविचक्षणे ।। १०

शत्रुघ्ने शत्रुदलने चेतसा पूर्णतां गते ।

अलमानन्दमायाते राकाचन्द्रोपमे स्थिते ।। ११

सुमित्रे मित्रतां याते मानसे दुःखशीलिते ।

विकासिहृदये जाते तत्काल इव पंकजे ।। १२

तत्रस्थेषु तथान्येषु तदा मुनिषु राजसु ।

सुधौतचित्तरत्नेषु प्रोल्लसत्स्विव चेतसा ।। १३

उदभूत्पूरयन्नाशाः कल्पाभ्ररवमांसलः ।

अथ मध्याह्नशंखानामब्धिघोषसमः स्वनः ।। १४

महता तेन शब्देन तिरोधानं मुनेर्गिरः ।

ययर्जलदनादेन कोकिलध्वनयो यथा ।। १५

मुनिरन्तरयांचक्रे स्वां वाचमथ संसदि ।

जितसारो गुणः केन महता समुदीर्यते ।। १६

मुहूर्तमात्रं विश्रम्य श्रुत्वा मध्याह्ननिःस्वनम् ।

घने कोलाहले शान्ते रामं मुनिरुवाच ह ।। १७

रामाद्यतनमेतावदाह्निकं कथितं मया ।

प्रातरन्यत्तु वक्ष्यामो वक्तव्यमरिमर्दन ।। १८

इदं नियतितः प्राप्तं कर्तव्यं तद्विजन्मनाम् ।

मध्याह्नमुपपन्नं यत्कर्तव्यं नावसीदति ।। १९

त्वमप्युत्तिष्ठ सुभग समस्ताचारसत्क्रियाम् ।

आचराचारचतुरस्नानदानार्चनादिकाम् ।। २०

इत्युक्त्वा मुनिरुत्तस्थौ समं दशरथः प्रभुः ।

ससदाः सेन्दुरादित्य उदयाद्रितटादिव ।। २१

तयोरुत्तिष्ठतो सर्वा सभोत्थातुमकम्पत ।

मन्दवातपरामृष्टा नलिनीवालिलोचना ।। २२

उत्तस्थौ सावतंसोत्थभृंगमण्डलमण्डिता ।

करिसेनेव सन्ध्याद्रावालोलकरपुष्करा ।। २३

परस्परांगसंघट्टचूर्णितांगदमण्डली ।

रत्नपूर्णारुणाम्भोदसन्ध्यासमयसूचनी ।। २४

पतदुत्तंसविभ्रान्तभृंगोपहितघुंघुमा ।

मुकुटोद्दामविद्योतशक्रचापीकृताम्वरा ।। २५

कान्तालताहस्तदलचारुचामरमंजरी ।
वनलेखेव विक्षुब्धवरवारणमण्डला ।। २६
कचत्कटकभारक्तीकृतान्योन्यतताम्बरा ।
वातव्याधूतपुष्पेव मन्दारवनमालिका ।। २७
कर्पूरकणनीहाररचितामलवारिदा ।
शरहित्कूटमालेव प्रसृताशेषभूमिका ।।२८
लोलमौलिमणिप्रान्तपाटलाम्बरकोटरा ।
संध्येवाफुल्लनीलाला कार्यसंहारकारिणी ।। २९
रत्नांशुसलिलापूरमुखपद्मनिरन्तरा ।
पद्मिनीवालिवलिता नूपुरारवसारसा ।। ३०
संतता सा सभोत्तस्थौ भूभृच्छतसमाकुला ।
भूतसंततिसंभ्रान्ता सृष्टिर्नवमिवोदिता ।। ३१
प्रणम्याथ नृपं भूपा निर्ययुर्नृपमन्दिरात् ।
शक्रचापीकृता रत्नैरम्बुधेरिववीचयः ।। ३२
सुमन्त्रो मन्त्रिणश्चैव वसिष्ठमथ भूमिपम् ।
प्रणम्य जग्मुः स्नानाय रसविज्ञानकोविदाः ।। ३३
वामदेवादयश्चान्ये विश्वामित्रादयस्तथा ।
वसिष्ठं पुरतः कृत्वा तस्थुरावर्जनोन्मुखाः ।। ३४
राजा दशरथस्तत्र पूजयित्वा मुनिव्रजम् ।
तद्विसृष्टो जगामाथ स्वकार्यार्थमरिन्दमः ।। ३५
वनं वनास्पदा जग्मुर्व्योम व्योमनिवासिनः ।
नगरं नागराश्चैव प्रातरागमनाय ते ।। ३६
महीपतिवसिष्ठाभ्यां प्रणयात्प्रार्थितः प्रभुः ।
वसिष्ठसद्मनि निशां विश्वामित्रोऽत्यवाहयत् ।। ३७
वसिष्ठः सह विप्रेन्द्रैः पार्थिवैर्मुनिभिस्तथा ।
उपास्यमानो रामाद्यैः सर्वैर्दशरथात्मजैः ।। ३८

जगाम स्वाश्रमं श्रीमान्सर्वलोकनमस्कृतः ।

अनुयातः सुरौघेन ब्रह्मलोकमिवाब्जजः ।। ३९

तस्मात्प्रदेशाद्रामादीन्पुनर्दशरथात्मजान् ।

सर्वान्विसर्जयामास पादोपान्ते नतानसौ ।। ४०

नभश्चरान्धरणिचरानधश्चरान्विसृज्य संस्तुतगुणगोचरांश्च तान् ।

यथाक्रमं स्वगृहमुदारसत्त्ववांश्चकार तां द्विजजनवासरक्रियाम् ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते मो० उपशमप्रकरणे आह्निकवर्णनं नाम प्रथमः सर्गः ।। १ ।।